श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ नक्षत्रमालास्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नक्षत्रमालास्तबकः ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसादतः।
अश्विनीहस्तिसंपन्ना सम्पदुज्जृम्भते नृणाम्॥ १॥

भगवति सुधाब्धिकन्ये भवतीं भूष्णुः प्रपद्येऽहम्।
परमाभरणीभूतां भुजान्तरे भोगिशैलेन्दोः॥ २॥

निजशिरसि निदधदुच्चैः सम्पन्मय्यास्तवाम्ब सोदर्यम्।
अपि सकलविभवदायी हा वस्त्रीभूतकृत्तिको भिक्षुः॥ ३॥

तामसह्यभवतापशान्तये स्तौमि तामरसवासिनीमहम्।
वर्णयन्ति यदपाङ्गमालिकां वासुदेवनिलयाधिरोहिणीम्॥ ४॥

तुहिनधामजयाभिमुखं मुखं मृगशिरोमणिदर्पमुषौ दृशौ।
विघटकं च वपुस्तडिदुन्नतेर्भुवनमातरतो न तवोपमा॥ ५॥

वरुणालयेन्द्रतनये वरुणार्द्रास्तव लोकमातुरवलोकविशेषाः।
परितन्यमानदुरितस्तबकं मामधुना पुनन्तु मधुनाशनकान्ते॥ ६॥

शापेन रोषणमुनेः शमितप्रभावो
देवोत्तमो मधुजितो दयिते विषण्णः।
तन्वंस्तव स्तववचः स्तबकैः सपर्यां
स्थाने विराजति पुनर्वसुरुद्रसेव्ये॥ ७॥

निगमकथितमायुर्निस्तुलारोग्यभाग्यं
निरवधिकविभूतिं नित्यहृद्यां च विद्याम्।
भगवति गुणपूर्तिं भासमानां च कीर्तिं
बलिरिपुपदभक्तिं भेजुषां पुष्यसि त्वम्॥ ८॥

शेषाचलाधीशाङ्कोश्लेषाचलामोदोन्नतिः
    सैषा भवोन्मेषाब्धिसंशोषावहा विश्वप्रसूः।
तोषाय नः कल्पेत दुर्दोषापहं यस्याः पदं
    भाषाशचीमुख्यद्युसद्योषाशिरोभूषायते॥ ९ ॥

इहोपास्ते यस्ते चरणकमलद्वन्द्वममलं
    स पूज्यः स्वाराज्यं जननि कलयिष्यन्नविकलम्।
मघोनः साम्राज्यं मदनमथनस्यापि विभवं
    तृणप्रायं प्रायो गणयति पदं द्रौहिणमपि॥ १० ॥

आर्यसेवितमक्षयं फलमिष्टमार्यमतारकं
    यत् क्षणेन निजेक्षणेन मुदा ददाति सनातनम्।
तत् तडित्समधाम मङ्गलनाम तामरसालयं
    पालयत्विममानमत्सुरयौवतं परदैवतम्॥ ११ ॥

एकेनाञ्जलिनैव कञ्जनिलये सर्वार्थमुर्वीतले
    सन्दायाथ मुकुन्दमन्दिरगतिं संतन्वतीं त्वां विना।
मा रंस्तातिखले चले नृपकुले वागुत्तरा फल्गुनी-
    त्याशासेऽहमहर्निशं तदितरद्याचामि नो जातु चित्॥ १२ ॥

क्षिपतु क्षिप्रमनल्पमप्रतिहतस्तापत्रयं मामकं
    भवदावाग्नि भयापहस्तव कृपावीक्षासुधानिर्झरः।
व्यथयन् साधुकदम्बमम्ब विहितप्रौढागमव्याहतिः
    शशिनः सोदरि हानिदाघविभवः शान्तिं यतो विन्दति॥ १३ ॥

लोकेपाकारिमेके विरचितयजनश्रेणयः प्रीणयन्ते
    केचित् त्रासापनुत्त्यै विदधति नृहरेर्योगिवर्याः सपर्याम्।
अन्ये पाथोधिकन्ये हरपरिचरणं कुर्वते सर्वदेह
    त्वामेवामेयरूपां मनसि वयममी सर्वदा भावयामः॥ १४ ॥

मयि सर्वापकृतिक्षमेऽपि कलय स्वातीव शीतां दयां
    हरिकान्ते भुवनोपकारनिरतेष्वन्येषु धन्येष्विव।

पनसाम्रादिमहीरुहेषु ददती भूरीणि वारीणि सा
विषवृक्षेऽपि मुहुः प्रवर्षति न किं विश्वाम्ब कादम्बिनी॥ १५॥

पूर्णं वर्णयितुं तवाङ्ग निगमा न प्राभवन् प्राभवं
यस्याः स्वर्गणिका मुदं विदधते दास्येन लास्येन च।
वाणी सापि विशाखदन्तिमुखयोर्मातापि जातादरे
धन्ये चामरवीजनं रचयतो धत्ते कलार्चीं शची॥ १६॥

बहुतरमनुराधारयता मुखैरखिलश्रुतीः
नळिनजनुषा निर्मातुमहो यदम्ब न शक्यते।
कथमिह तव स्तोत्रे कवयः शक्ता स्वयमिन्दिरे
जगति शिशवः शक्यार्थकृतोऽथ वा जननीमुदे॥ १७॥

त्रस्यत्ताताभिहितवचनत्राणधर्माय सीते
ज्येष्ठैकार्हे रघुपरिबृढे राज्यमुत्सृज्य याते।
विश्वं त्रातुं त्वमनुचलिता वीरमेनं हि नो चेत्
कस्माद्भस्मीभवतु जगतां कण्टकः पङ्क्तिकण्ठः॥ १८॥

द्विषच्च्यमूलयेच्छया तवाङ्घ्रिपद्ममिन्दिरे
स्फुरत्सरोजमन्दिरे सुराः पुरा ववन्दिरे।
तदेव संपदे वयं निरापदे तमोभिदे
भजामहे भुजायुगीयुजा नतेन मौलिना॥ १९॥

कलितनियमपूर्वाषाढकाषायचेला
यतसकलहृषीका यद्यतीन्द्रा विशन्ति।
तदपि भजति धाम न्यस्य भारं त्वदङ्घ्रौ
मम जननि नृपाशो मादृशो बालिशोऽपि॥ २०॥

सारापदानशतमोदितविश्वदेव-
तारापतिस्थमपि भानुसुतेन राज्यम्।
त्वत्प्राप्तिकार्यसहकारिगिरैव लब्धं
कार्योद्यमो हि महतां कमले शिवाय॥ २१॥

दुरितं विषह्य निखिलं दयानिधे परिपात्वकिञ्चनजनं भवानिति।
जगदुद्भवादिनिरतस्य शार्ङ्गिणः श्रवणेऽभिधेहि रहसि स्वयं रमे॥ २२॥

अशक्तोऽस्मि दुःसाधनिष्ठासहस्रेष्वहं कर्मबोधाद्युपायान्तरेषु।
अतस्तावकीने सुरद्रोरनूने पदे लोकमातः प्रपद्येऽतिभीतः॥ २३॥

त्वत्परिग्रहजुषं द्विषन् रमे क्षीयते बहुसहायवानपि।
तन्निदर्शनमपास्तवारिजश्चन्द्रमाः शतभिषङ्निषेवितः॥ २४॥

भगवति यस्य भवद्गुणकीर्तनकम्प्रौष्ठपदमास्यम्।
भवति हि जगति गतिस्तच्चरणाम्बुजरेणुरस्माकम्॥ २५॥

त्वत्पदमरविन्दगृहे वन्दन्ते जन्तवो भुवि ये।
भुवनोत्तरभाद्रपदक्षुण्णममीषां गृहद्वारम्॥ २६॥

शिशिरेऽवतीर्य सिन्धौ साकं शीतांशुना पद्मे।
करुणार्द्रे कान्तहृदि स्थास्नुर्मुष्णासि तापं मे॥ २७॥

संग्रथ्य चित्रैः पदरत्नखण्डैः समर्पिता दास्यजुषा मयैषा।
नक्षत्रमाला नदराजकन्ये हृद्या त्वदीये हृदये चकास्तु॥ २८॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे नक्षत्रमालास्तबकः॥